# Bhagavannamanusaram Phalapraptih

# भगवन्नामानुसारं फलप्राप्तिः

## Document Information

Text title : Bhagavannamanusaram Phalapraptih

File name : bhagavannAmAnusAraMphalaprAptiH.itx

Category : vishhnu

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : from Vishnudharma Upapurana. Adhyaya 24

Latest update : December 25, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

December 25, 2021

*sanskritdocuments.org*

# भगवन्नामानुसारं फलप्राप्तिः

एकस्यैव सतस्तस्य ब्रह्मणो द्विजसत्तम ।
नाम्नां बहुत्वं लोकानामुपकारकरं शृणु ॥ १०॥

निमित्तशक्तयो नाम्नो भेदतस्तदुदीरणात् ।
विभिन्नान्येव साध्यन्ते फलानि कुरुनन्दन ॥ ११॥

यच्छक्ति नाम तत्तस्य तत्तस्मिन्नेव वस्तुनि ।
साधकं पुरुषव्याघ्र सौम्यक्रूरेषु वस्तुषु ॥ १२॥

वासुदेवाच्युतानन्तसत्याज्य?पुरुषोत्तमैः ।
परमात्मेश्वराद्यैश्च स्तुतो नामभिरव्ययः ॥ १३॥

निमित्तभावं भगवान्विमुक्तेर्यात्यधोक्षजः ।
तथान्यकार्यसंसिद्धौ यद्यत्तत्तन्निशामय ॥ १४॥

धनकृद्धर्मकृद्धर्मी धर्मात्मा विश्वकृच्छुचिः
शुचिषद्विष्णुरब्जाक्षः पुष्कराक्षो ह्यधोक्षयः ।
शुचिश्रवाः शिपिविष्टो यज्ञेशो यज्ञभावनः ॥ १५॥

नाम्नामित्येवमादीनां समुच्चारणतो नरः ।
धर्मं महान्तमाप्नोति पापबन्धक्षयं तथा ॥ १६॥

तथार्थप्राप्तये ब्रह्मन्देवनामानि मे शृणु ।
येषां समुच्चारणतो वित्तमाप्नोति भक्तिमान् ॥ १७॥

श्रीदः श्रीशः श्रीनिवासः श्रीधरः श्रीनिकेतनः ।
श्रियः पतिः श्रीपरमः श्रीमान् श्रीवत्सलाञ्छनः ॥ १८॥

नृसिंहो दुष्टदामनो जयो विष्णुस्त्रिविक्रमः ।
स्तुतः प्रयच्छते चार्थमेवमादिभिरच्युतः ॥ १९॥

काम्यः कामप्रदः कान्तः कामपालस्तथा हरिः ।

आनन्दो माधवश्चैव कामसंसिद्धये नृप ॥ २०॥

रामः परशुरामश्च नृसिंहो विष्णुरेव च ।
विक्रमश्चैवमादीनि जप्यान्यरिजिगीषुभिः ॥ २१॥

विद्यामभ्यसता नित्यं जप्तव्यः पुरुषोत्तमः ।
दामोदरं बन्धगतो नित्यमेव जपन्नरः ॥ २२॥

केशवं पुण्डरीकाक्षं पुष्कराक्षं तथा जपेत् ।
नेत्रबाधासु सर्वासु हृषीकेशं भयेषु च ॥ २३॥

अच्युतं चामृतं चैव जपेदौषधकर्मणि ।
भ्राजिष्णुमग्निहानौ च जपेदालम्बने स्थितम् ॥ २४॥

सङ्ग्रामाभिमुखं गच्छन्संस्मरेदपराजितम् ।
पातालनरसिंहं च जलप्रतरणे स्मरेत् ॥ २५॥

चक्रिणं गदिनं चैव शार्ङ्गिणं खड्गिनं तथा ।
क्षेमार्थे प्रसवन्राजन्दिक्षु प्राच्यादिषु स्मरेत् ॥ २६॥

अजितं चाधिकं चैव सर्वं सर्वेश्वरं तथा ।
संस्मरेत्पुरुषो भक्त्या व्यवहारेषु सर्वदा ॥ २७॥

नारायणं सर्वकालं क्षुतप्रस्खलितादिषु ।
ग्रहनक्षत्रपीडासु देवबाधाटवीषु च ॥ २८॥

दस्युवैरिनिरोधेषु व्याघ्रसिंहादिसङ्कटे
अन्धकारे च तीव्रे च नरसिंहमनुस्मरेत् ।
तरत्यखिलदुर्गाणि तापार्तो जलशायिनम् ॥ २९॥

गरुडध्वजानुस्मरणादापद्भ्यो मुच्यते नरः ।
ज्वरदुष्टशिरोरोगविषवीर्यं प्रशाम्यति ॥ ३०॥

स्नाने देवार्चने होमे प्रणिपाते प्रदक्षिणे ।
कीर्तयेद्भगवन्नाम वासुदेवेति तत्परः ॥ ३१॥

स्थगने वित्तधान्यादेरपध्याने च दुष्टजे ।
कुर्वीत तन्मना भूत्वा अनन्ताच्युतकीर्तनम् ॥ ३२॥

नारायणं शार्ङ्गधरं श्रीधरं पुरुषोत्तमम् ।
वामनं खड्गिनं चैव दुःस्वप्नेषु च संस्मरेत् ॥ ३३॥

एकार्णवाहिपर्यङ्कशायिनं च नरः स्मरेत् ।
वाय्वग्नीगृहदाहाय प्रवृद्धावुपलक्ष्य च ॥ ३४॥

विद्यार्थी मोहविभ्रान्तिवेगाघूर्णितमानसः ।
मनुष्यो मुनिशार्दूल सदाश्वशिरसं स्मरेत् ॥ ३५॥

बलभद्रं  समृद्ध्यर्थी सीरकर्मणि कीर्तयेत् ।
जगत्सूतिमपत्यार्थी स्तुवन्भक्त्या न सीदति ॥ ३६॥

जप्तव्यं सुप्रजाख्यं तु देवदेवस्य सत्तम ।
दम्पत्योरात्मसम्बन्धे विवाहाख्ये पुनः पुनः ॥ ३७॥

श्रीशं सर्वाभ्युदयिके कर्मणि सम्प्रकीर्तयेत् ।
अरिष्टान्तेष्वशेषेषु विशोकं च सदा जपेत् ॥ ३८॥

मरुत्प्रतापाग्निजलबन्धनादिषु मृत्युषु ।
स्वातन्त्र्यपरतन्त्रेषु वासुदेवं जपेद्बुधः ॥ ३९॥

सर्वार्थशक्तियुक्तस्य देवदेवस्य चक्रिणः ।
यद्वाभिरोचते नाम तत्सर्वार्थेषु कीर्तयेत् ॥ ४०॥

सर्वार्थसिद्धिमाप्नोति नाम्नामेकार्थता यतः ।
सर्वाण्येतानि नामानि परस्य ब्रह्मणोऽनघ ॥ ४१॥

एवमेतानि नामानि देवदेवस्य कीर्तयेत्
यं यं काममभिध्यायेत्तं तमाप्नोत्यसंशयम् ।
सर्वान्कामानवाप्नोति समाराध्य जगद्गुरुम् ॥ ४२॥

तन्मयत्वेन गोविन्दमित्येतद्दाल्भ्य नान्यथा ।
तन्मयो वाञ्छितान्कामान्यदवाप्नोति मानवः ॥ ४३॥

इति विष्णुधर्मेषु चत्वारिंशोऽध्यायान्तर्गता
भगवन्नामानुसारं फलप्राप्तिः समाप्ता ।

Proofread by PSA Easwaran

*Bhagavannamanusaram Phalapraptih*

pdf was typeset on December 25, 2021

Please send corrections to *sanskrit@cheerful.com*